रुपश्रोता दित्यो नुरव्याता द्यौः पिता पृथिवी माता प्रजापतिर्बंधु र्यएवास्मि स सं ॥२४॥
न्यजे यस्यास्मिन तमंतरे मि। होत्व प्रवरे जपति॥ अध्वर्युः ओदासु देवता सु·वेदे

नाग्निं त्रिरुपवाजयति। स्रुवेण ध्रुवाया आज्यमादाय वेदेनोपयम्योत्तरं परिधि
संधिमन्ववहृत्य स्रुवं॥ प्रजापतये मनवे स्वाहा। मनसा ध्यायन्। दक्षिणाप्रांचमृ
जुं दीर्घं संततं ज्योतिष्मत्याघारयति। सर्वाणीध्मकाष्ठानि संस्पर्शयति॥ यज
मानः प्रजापतये मनवे इदं। मनोसि प्राजापत्यं मनसा मा भूतेनाविश। स्रुवाघार
मनुमंत्रयते। अध्वर्युः स्रुवेणाज्यस्थाल्या आज्यमादाय। आप्यायतां ध्रुवा
घृतेन यज्ञं यज्ञं प्रति देवयद्भ्यः। सूर्याया ऊधोऽदित्या उपस्थ उरुधारा पृथिवी यज्ञे
अस्मिन्। ध्रुवामाप्याययति सर्वत्रैवं॥ अग्नीत्परिधींश्चाग्निं च त्रिस्त्रिः संमृड्ढि।
संप्रेष्यति॥ आग्नीध्रः इध्मसंनहनानि स्फ्य उपसंगृह्य प्रदक्षिणमनु परिक्रा
मन्य परिधीन्त्संमार्ष्टि। मध्यममनु दक्षिणं च प्रांचावितरौ मध्यमं संमृज्य प्रदक्षिणमग्ने
णाहवनीयं परिक्रम्य दक्षिणं संमृज्यापरेणाग्निमुदङ्ङतिक्रम्योत्तरं संमृज्य यथेतं प्र

द॰ म॰ सेत्स्य यथास्थानमवस्थापानि संमार्जनं तत्। सर्वत्र प्राङ्मुखः। अग्ने वाजजिद्वाजं त्वा
५ सरिष्यन्तं वाजं जेष्यन्तं वाजिनं वाजजितं वाजजित्यायै संमार्ज्म्यग्निमन्नादमन्नाद्या
यात्रिरग्निं॥ अध्वर्युः -- स्रुवेन मसि विप्रन्थं स्वाग्नेय हरिदं नमः। अग्ने पात्सु हूपमस्तो देवे
भ्यः प्राचीनमञ्जलिं करोति॥ स्वधा पितृभ्यः। दक्षिणा॥ अप उपस्पृश्य॥ जुह्वं स्रुग्नि
स्वाहाकृतं तिदेवयज्यायै। जुहूमादत्ते॥ उपभृदेहि देवस्त्वा सविता ह्वपति देवयज्यायै। उ
पभृतं। सुयमे मे घृताची भूयास्तं स्वाकृतौ स्वपाहृतौ। जुह्वतोभिहस्तो पभृतिजु
हूमवदधाति होव्यं स्तनैवमत्स्यावहरति॥ अग्ना विष्णू मावामवक्रमिषं विजिहाथां
मां मा संताप्तं लोकं मे लोककृतौ कृणुते। अनवच्छिन्नस्तरं दक्षिणोति क्रम्य॥ वि हेरव
ष्णोः स्थानमसीतन इन्द्रो अकृणोद्वीर्याणि। अवतिष्ठते तर्वेदिदक्षिणां पारमवघ्नन्स २५
व्यं कृत्वा दक्षिणं परिधिसंधिमन्ववहृत्य स्रुचं॥ सुमारभ्यो र्ध्वो अध्वरो दिविस्पृशमह्रुतो यु
संधि
दक्षिणेन

नोयज्ञपतेरिंद्रवान्त्स्वाहा॥ यजमानः-इंद्रायेदं०। वागस्यैंद्री संपत्नक्षयणी वाचा
मेंद्रियेणाविश॥ स्रुच्यमाघारं॥ अध्वर्युः हुत्वानुमार्ष्टि॥ दृंह भ्राः। स्रुचमुद्गृ
ह्णाति॥ पाहिमाग्ने दुश्चरितादामासुचरिते भज। असं स्पर्शयन्त्स्रुचौ त्वा काम उदूः
ति॥ समक्तमग्निनाघृतं समक्तं हविषा हविः। समेतरिक्षमर्दिषौ। जुह्वा
ध्रुवांजिः समनक्ति॥ उन्नीतं रायः। स्रुवेण ध्रुवाया आज्यमादाय। सुवीर्यस्त्वा
हा। जुहूं प्रत्युभिघारयति॥ वेत्तेनयतः संततः। जुह्वाध्रुवो। सादयित्वा स्रुचौ॥ इ
ध्मसंनहनानि स्फ्यउपसंगृह्य वेदेश्चात्र पूर्णमव्यंतमध्वर्युः प्रवरायावर्ततेता
न्याग्नीध्रोन्वारभ्य पश्चाद्देवतिष्ठते। अध्वर्युः-कं इदमध्वर्युर्भविष्यतिस इदम
ध्वर्युर्भविष्यति यस्तो यज्ञस्यविस्रो स्यानेति ध्यामिवागार्त्विज्यं करोतु मनआ
र्त्विज्यं करोतु वाचं प्रपद्ये भूर्भुवः। सुवः। जपति। आग्नीध्रः-कं इदमग्नीद्भविष्य

२४ तिस इद मग्नीन्द्रविष्यति यं । अध्वर्युः • ब्रह्मन्प्रवराया श्रावयिष्यामि । ब्रह्मा प्र
मामंत्रयते । जपमा • वौचस्पते ब्र वात् माश्रावयेता मा ग्रावयौति ॥ आग्नीध्रः • अस्तु
६ श्रौ३षट् । प्रत्याश्रावयति । अध्वर्युः • प्रवरं प्रवृणीते • अग्निर्देवो होता देवान्यक्ष
द्विद्वान् ऽ चिकित्वान्मनुष्वद्भरतवत्कुशिकवदघमर्षणवद्विश्वामित्रवद्ब्रह्मण्वदाच
क्षवद्ब्रह्मण्वा अस्य यज्ञस्य नाविता रः । असाविति होतुरुपांशुना म गृह्णाति । मानुषद्धु
चैः । विंद्यात् पाम (पत्तन ति) । यजमानः • देवाः पितरः ० रे मिनो देव या श्रावया युवे क्वे मध्यर्थो
से । अध्वर्युप्रवरे । चतुर्होतारं पुरस्तात्प्रयाजानां व्याचक्षीत ॥ अध्वर्युः घृतवतीं स्रुचम्मा ॥हेरव॥
स्य स्वेत्युच्यमाने जुहूपभृतावादाय दक्षिणा सक्रदतिक्रान्तः पंचप्रयाजान्यजति आ
श्राव्य पा आग्नीध्रः • अस्तु श्रौ३षट् । उत्करे दक्षिणामुखस्तिष्ठन्स्रुचौ धारयन्प्रत्याश्रा २६
वयति ॥ अध्वर्युः • समिधो यज । प्रथमे प्रयाजे संप्रेष्यति । वषट्कृते पुरस्ताज्जुहोति

यजमानः अग्नय इदं० । वसंत मृतूनां प्रीणा मि स मां प्रीतः प्रीणातु । अध्वर्युः आ
श्राव्य० प्रत्याश्रावि ते० यज । संप्रेष्यति । वषट्कृते दाक्षिणतो जुहोति ॥ यजमानः अ
ग्नय इदं० । ग्रीष्ममृतूनां प्रीणामि स मां प्रीतः प्रीणातु ॥ अध्वर्युः ० आश्राव्य प्रत्याश्रा
विते० यज । संप्रेष्यति । इति केचित् । एकस्मा आज्य मवशिष्य वषट्कृते पश्चाज्जुहोति
यजमानः अग्नय इदं० । वर्षा ऋतूनां प्रीणामि ता मां प्रीताः प्रीणंतु ॥ अध्वर्युः अर्ध
मौपभृतस्य जुह्वामानीयाश्राव्य० प्रत्याश्राविते० यज । संप्रेष्यति । वषट्कृते बर्हिरुत्त
रतो जुहोति ॥ यजमानः अग्नय इदं० । शरदमृतूनां प्रीणामि सा मां प्रीता प्रीणातु ॥
अध्वर्युः० आश्राव्य प्रत्याश्राविते० यज । संप्रेष्यति । वषट्कृते मध्ये स्वाहाकारं जुहो
ति ॥ यजमानः अग्नय इदं० । हेमंतशिशिरावृतूनां प्री । णितौ मा वामि तौ मां प्रीतौ
प्रीणीतां ॥ अध्वर्युः० प्रत्याक्रम्य प्रयाजशेषेण हवींष्यभिघारयति० ध्रुवामभि

स्रु.प्र. भिघार्याग्निं यमभिघारयति। आनुपूर्व्येण हवींषि उपस्तमंतत:। सादयित्वा स्रुचौ।
२७ आप्यायतां ध्रु०। जुह्वां चतुर्गृहीतं गृहीत्वा प्रस्तरे बर्हिरेका चतुर्थी प्रस्तरबर्हिरंजनं।
अग्नयेनुब्रूहि। आश्राव्य प्रत्याश्राविते अग्निं यज संप्रेष्यति। वषट्कृते उत्तरार्द्धे
जुहोति॥ यजमानः अग्नयइदं०। अग्निश्चक्षुष्मान् त्वस्याहं देवयज्यया चक्षुष्मान्भू
यासं॥ अध्वर्युः प्रत्याक्रम्य पूर्ववच्चतुर्गृहीतं गृहीत्वा सोमायानुब्रूहि। आश्राव्य प्र
त्याश्राविते सोमं यज। संप्रेष्यति। वषट्कृते दक्षिणार्द्धे जुहोति। यजमानः सोमाये
दं। सोमश्चक्षुष्मान् त्वस्याहं देवयज्यया चक्षुष्मान्भूयासं। पंचहोतारं पुरस्ताद्धवि
षामवदानानां व्याचक्षीत॥ अध्वर्युः स्रुच्युपस्तीर्य० मामे मांसं वि क्ष्या मा त्वा हिं०सि
षमार्तेतेजोपंक्रमीत्रा भरतमुर्द्दर्षं मर्मविषं चावदानानितिप्रत्यवदास्याभिनमस्ते हेरव
अस्तु मा मा मा हिंसीः हविरसि मेरस्य मा ससद्द्विताभ्यां मे गत्नीभ्यामे गत्वे नच ५२७

मध्यात्पुरोडाशस्यावदाय पूर्वार्धोद्द्वयति· पश्चार्द्धात्तृतीयं पंचावत्तिनः।
आप्यायतां ध्रुव॰ अभिघार्य· यदवदानानि तेवद्यन्विलोमाकार्षमात्मनः। आ
त्येनुप्रत्यंनग्न्येनुस्मतु आप्यायतां पुनः। हविः प्रत्यभिघारयति। अग्नयेनुब्रूहि।
आश्राव्य प्रत्याश्राविते· अग्निं यज। संप्रेष्यति। वषट्कृते जुहोति सर्वाणि हवींषि तावंत
रेणयजति। अपदधदिवा प्रक्ष्यन्पुरोडाशाहुतिं जुहोत्याज्यं हुत्वावदानं जुहोत्यंततोऽभ्य
वश्रावयति मुखेनेतराः स्रावयति।। यजमानः· अग्नय इदं·। अग्नेरहंदेवयज्ययान्नादो
भूयासं।। अध्वर्युः· एवमेवचतुर्गृहीतं गृहीत्वा· प्रजापतये उपांशुत्वा· अनुब्रूहि·
उच्चैः· आश्राव्य प्रत्याश्राविते· प्रजापतिं उपांशु· यज। उच्चैः। वषट्कृते जुहोति।। यज
मानः· प्रजापतय इदं·। दब्धिरस्यदब्धो भूयासंयामानं दभेयं।। अध्वर्युः· स्रुच्युपस्ती
र्न· ...मोर्मो· । अवदायाभिघार्य· यदवदानानि॰। हविः प्रत्यभिघारयति। अग्नीषोमाभ्या

द॰प्र॰ मनुब्रूहि। आश्राव्य प्रत्याश्राविते · अग्नीषोमौ यज। संप्रेष्यति। वषट्कृते जुहोति॥
२८ यजमानः। अग्नीषोमाभ्यामिदं ०। अग्नीषोमयोरहं देवयज्ययान्नादो भूयासं।। अध्व
र्युः॥ स्रुचावुपस्तीर्य · माभेर्मा ०। अवदायाभिघार्य त्यदेवदा०। हविः प्रत्यभिघारयति। इं
द्राय वैमृधायानुब्रूहि। आश्राव्य प्रत्याश्राविते · इंद्रं वैमृधं यज। वषट्कृते जुहोति
। इंद्राय वैमृधायेदं ०। इंद्रस्य वैमृधस्याहं देवयज्यया सपत्नो भूयासं॥ इति पौर्णमास्यां
। अमावास्यायां तु · आग्नेयेन प्रचर्य · ऐंद्राग्नेन प्रचरति अग्नीषोमवत् ऊहे विशेषः
। इंद्राग्निभ्यामनुब्रूहि। इंद्राग्नी यज। इंद्राग्निभ्यामिदं ०। इंद्राग्न्योरहं देवयज्ययेंद्रि
याव्यन्नादो भूयासं॥ इत्यसन्नयतः॥ सन्नयतः सान्नाय्याभ्यां प्रचरति · दिःश्टत हेरव
स्यावद्यति द्विरं भ०। अभिघार्य · यदेवदा० हविः प्र०ति। इंद्रायानुब्रूहि। महेंद्राये २८
ति वा। आश्राव्य प्रत्याश्राविते · इंद्रं यज० महेंद्रं वा॥ यजमा०। इंद्रायेदं ०। इंद्रस्या

महेंद्रस्याहं देवयज्ययाजेमानं महि
हं देवयज्ययेंद्रियावीर्यवान्यासं महेंद्रायेदं०। महेंद्रस्याहं देवयज्ययाजेमानं महि
मानंगमेयं॥इत्यमावास्यायां॥अध्वर्युः स्रुच्युपस्तीर्य सर्वेभ्य उत्तरार्धेभ्यः सकृत्स
कृदवद्यति। द्विः पंचावत्तिनः। द्विरभिघारयति न हविः प्रत्यभिघारयति। अग्नये स्विष्ट
कृतेनुब्रूहि। आश्राव्य प्रत्याश्राविते अग्निं स्विष्टकृतं यज। संप्रेष्यति। वषट्कृत उ
त्तरार्धपूर्वार्धे संसक्तामितराहुतिभिर्जुहोति। यजमानः अग्नये स्विष्टकृत इदं। अ
ग्नेः स्विष्टकृतोहं देवयज्ययायुष्मान्यज्ञेन प्रतिष्ठां गमेयं। अग्निर्मा दुरिष्टात्पातु स
विता घशं साधोमे तिदूरेरातीयति तमेतेनजेषं॥अध्वर्युः प्रत्याक्रम्य स्रुचमग्निः
पूरयित्वा वैश्वानरे हविरिदं जुहोमि साहस्रमुत्सं शतधारमेतं। तस्मिन्नेष पितृ
पितामहं प्रपितामहं स्वर्गे लोके बिभरत्पिन्वमाने। परिध्यभावे ग्रहमेधीये
पि मध्यमे परिधिं प्रदक्षिणमनुपरिषिंचति॥यजमानः पित्रे पितामहाय प्रपिताम

हे·द·भ· हायेदं०॥अध्वर्युः सादयित्वा स्रुचौ। प्राशित्रं स्थालीगतेनाज्येनोपस्तीर्य· आग्नेये
२९ प्रांच विरुज्य पुरस्ताच्छ्य· अंगुष्ठेनोपमध्यमया चांगुल्यादायाविरुज्योत्तरस्मा
त्पुरुभयं यवमात्रं पिप्पलमात्रं मंत्रो न लिंगविरोधात्।अन्यायोयवमात्रादाव्याधा
र्कलतामिदं मा रूरुपाम यज्ञस्य शुद्ध ९ स्विष्टमिद ९ हविः॥अनुमन्त्रय प्राशित्र
मवद्यति॥ब्रह्मा· मित्रस्य त्वा चक्षुषा प्रेक्षे।प्राशित्रमवदीयमानं प्रेक्षते॥अध्व
र्युः अभिघार्याग्रेणाहवनीयं ब्रह्मयजमानावाहवनीयं चोत्तरेणानी।त्वा परेणाह
वनीयं निदधाति इडापात्रमुपस्तीर्य· मध्येनाङ्गुष्ठेन घृतपदौ छिन्द्याच्चरुणा समीरित्वा।
दक्षिणार्धादसंभिंदन्नवद्यान्यैकुतोमुखो।दक्षिणार्धात्पुरोडाशस्य पूर्वमवदान हेर
मवद्यति पूर्वार्धाद पञ्चमिनदीर्घं यजमानभागं तमान्येन संतर्प्य ध्रुवायाउपोत्या। सं
भेदमवद्यति सर्वेभ्यो हविर्भ्यः।अभिघार्य प्राचीं प्रोहति।अग्रेण होतारं दक्षिणाति २९

क्रम्य प्रदक्षिणमावृत्य पश्चात्प्राङासीनो होतुरंगुलि पर्वणी। अनक्ति। पूर्वमग्रेथा
परं। प्रसव्यमावृत्य यथेतं प्रत्येत्य पुरस्तात्प्रत्यङ्ङासी। नो होत्र इडां प्रयच्छति॥ यजमानः
सुरूपवर्षवर्ण एहीमा न्भद्रान्दुर्या ॅं अभ्येहि मामनुव्रता न्युशीर्षा णिं मृड्ढ्व मिड एत्य
दितएहि सरस्वत्येहि रंतिरसि रमतिरसि सूनर्यसि जुष्टे जुष्टिं तेशीय योपहूतउपहवं
तेशीय। इडामाह्रियमाणां प्रतीक्षते॥ अध्वर्युः दक्षिणे होतुः पाणौ विडाया अवां
तरेडामवद्यति लेपादुपस्तृणाति सकृद्द्वदधाति॥ होता स्वयं द्वितीयमादत्ते॥ अध्व
र्युः लेपेनाभिघारयति। उपहूयमानामध्वर्युराग्नीध्रो यजमानश्चान्वारभंते॥ य
जमानः इड एह्यदित एहि भव्य स्येहि श्रेयस्येहि वसीयस्येहि चित्र एहि दधि व एहि
उपोश्चप हदेसप्तदेवगवीजेपति। चिदसि मनासि धीरसि रंतीरमतिः सूनरी सूनृतौ वि
श्वात्वं भूतानि प्राणिहि विश्वान्भूतान्यनुप्राणं तु भवस्यायुरसि। शिरसि। सुरूपवर्षव

उ ॐ उपहवे। सप्तहनृजागवीजेपति २

ज्युक्षीर्बाणिभृछ० सानः प्रियासुप्रतु
ह.प्र. वर्णो एहीमा न्मुद्रां दुधी ॰ अन्येहि मामनु मणान्युक्षी एहि रमते एहि सून्हले एहि सुह
र्तिः प्रियानः सुतस्चाः प्रियवतीमघोनीनुप एहिरंत एहि रमते एहि स्येनाम्योने घ्तेनमां समु
१ चामएं हि सहरायस्योषेणदेवीर्दवैरभिमानिवते ध्वंस्यानास्योनेघ्तेनमांसमु स्याति
क्षतनमएतदुपदंभिषग्द्रविर्वस्त्रायद्दोसमुद्राहुस्वन्नि व। स्नुचावागग्ने विमस्याति
ष्वतिर्द्दंगेभिर्दशभिर्दिशन्॥ उच्चैरुपह्वे वायविडातेमाताः॥ होतारमीक्षमाणोवायुं
मनसाध्यायेत्॥ उपहूतायमिस्नुच्यमाने उपहूतः पशुमान सानि। जपति॥ अस्मा
स्विंद्रइंद्रियंदधात्वस्मान्रायउत यज्ञाः संचंतामस्मास्तुसंत्वाशिषः सा नः प्रियासुप्रते हरव
र्तिर्मघोनीजुष्टिरसिजुषस्वनोजुष्टानोसिजुष्टिंतेगमेयं। इडैयाअहंदेवयज्ययापु ३०
ष्टिमान्पशुमानभूयासमिडेभागंजुषस्वनोजिन्वगाजिन्वार्वतस्तस्यास्तेभक्षिवाणःस्याम
सर्वास्मानःसर्वगणाः। इडाधेनुःसहवत्सानआगादूर्जंदुहानापयसाप्रपीना। सानो

अग्नेनहविषोतगो भिरिडा जिन्वतोपयस्सभ्यमस्मान्॥ उपहूतामिडां॰ अध्वर्युः
दैव्याअध्वर्यीवइत्युच्यमाने॰ उपहूतः पशुमानसानि। जपति॥ उपहूतायामग्रेणाहव
नीयंपरीत्यब्रह्मणेप्राशित्रं परिहरति॥ ब्रह्मा॰ ऋतस्यपथापर्येहि।पर्याह्रियमाणं॰
सूर्यस्यत्वाचक्षुषाप्रतिपश्यामि॥आह्रियमाणं॰ देवस्यत्वासवितुःप्रसवेश्विनोर्बा
हुभ्यांपूष्णोहस्ताभ्यांप्रतिगृह्णामि।प्रतिगृह्य॰ पृथिव्यास्त्वानाभौसादयामीडायाःप
दे।अपरेणाहवनीयंब्रह्मत्वृत्तणानिप्राग्दंडं सादयति॥ सुपर्णस्यत्वागरुत्मतश्चक्षु
षावपश्यामि।अवेक्ष्य॥ देवस्यत्वास॰ हस्ताभ्यामाददे। अंगुष्ठेनोपमध्यमयाचांगुल्या
दाय अग्नेस्त्वास्येनप्राश्नामि।प्राश्नाति॥ ब्राह्मणस्योदरेण। असंस्पृष्टंत्यावगिरति
।नदंतोगमयति।यॊअप्स्वंतर्देवतास्ताइदं शमयंतुस्वाहाकृतंजठरेमिंद्रस्यमिश्र
गच्छ।अद्भिरभ्यवहरति।आचम्य॥ प्रंसिनामेमासंहृक्ष्याऊर्ध्वंमेनाभेः सीदेंइस्यत्वा

ह॰द॰म
३१

नष्टरेसारयामि। नाभिं देशामभिमृशति॥ वाङ्म आसन्। नसोः प्राणः। अक्ष्योश्चक्षुः। कर्णयोः श्रोत्रं। बाह्वोर्बलं। ऊर्वोरोजः। यथारूपमायतनानि संमृशति॥ अरिष्टा विश्वान्यंगानि तनूस्तन्वा मे सह नमस्ते अस्तु मा मा हिंसीः। सर्वाण्यंगानि॥ पात्रं प्रक्षाल्य पूरयित्वा॰ दिशो जिन्व। पराचं निनयति॥ अपरं पूरयित्वा॰ मां जिन्व। अभ्यात्मं निनयति। रजसि स्योनासि स्योना नः त्सा नो रायस्पोषेसु प्रजास्त्विषीः। मुखस्यत्वा त्वं सुरभ्यास्यत्वा स्वत्वा प्राश्नामि। उपहूता ऋत्विजः प्राश्नंति यजमानपंचमोवाग्यता भवंत्यामार्जनात्। मनो ज्योतिर्जुषतामाज्यं विच्छिन्नं यज्ञं समिमं दधातु। बृहस्पतिस्तनुतामिमं नो विश्वे देवा इह मादयंतां। अंतर्वेदि पवित्रं वतिमस्ता रदेशेमार्जयंते॥ अध्वर्युः आग्नेय्यं चतुर्थी विरुज्य बर्हिषदं करोति॥ यजमानः ब्रह्म पिन्वस्व ददतो मे मा क्षायि कुर्वतो मे मोपदसदिशां कॢप्तिरसि दिशो मे कल्पंतां कल्पंतां मे दिशो

दैवीश्च मानुषीश्चाहोरात्रे मे कल्प्येताम् अर्धमासा मे कल्प्यन्तां मासा मे कल्प्यन्ता ऋतवो मे
कल्प्यन्तां संवत्सरो मे कल्प्यतां क्लृप्तिरसि कल्प्यतां मे। आशानां त्वाशापालेभ्यश्चतुर्भ्यो
अमृतेभ्यः इदं भूतस्याध्यक्षेभ्यो विधेम हविषा वयं। भजतां भागी भागं मा मा भागो भक्त
निरभागं भजामो। अपास्पिन्वौषधीर्जिन्व द्विपात्पाहि चतुष्पादव दिवो वृष्टिमेरय। ब्रा
ह्मणानामिदं हविः सोम्यानां सोमपीथानां निर्भक्तो ब्राह्मणो नेह ब्राह्मणस्यास्ति
प्रतिदिशं व्यूहति॥ इदं ब्रह्मणः। इदं होतुः। इदमध्वर्योः। इदमग्नीधः। चतुर्धाव्यादिश
ति॥ अध्वर्युः इदं यजमानस्य। यजमानभागमादिशति॥ अग्नीधे षडवत्तं संपादय
ति। उपस्तीर्य विदायाभिघारयत्येवं पुनरवद्यंति॥ अग्रेणाहवनीयं वेदेन ब्रह्मयजमा
नभागौ परिहरत्यस्येन्व्येन पात्रेण होत्रे त्यनेनाध्वर्यवे॥ आग्नीध्रं दिवो भागोस्यग्नेरा

ग्नीध्रमस्यग्नेः ज्ञामित्रमस्यग्ने स्त्वा स्येन पात्रामिनमस्ते अस्तु मामाहिंसीः प्राश्ना

द॰प्र॰ ति॥अध्वर्युः॰ अंतरिक्षस्यभागोसि। प्राश्नाति॥ अन्वाहार्यमभिघार्योत्तरवेद्यामासाद
३२ यति॥ब्रह्मा॰ ब्रह्मन्ब्रह्मासि ब्रह्मणे त्वा हुतादमामाहिं॰ सीरहुतोमत्स्य॰२ शिवोभव॑।
प्रजापतेर्भागोस्यूर्जस्वान्पयस्वान्प्राणापानौ मेपाहि समानव्यानौ मेपात्युदानव्या
नौमेपात्वक्षितोस्यक्षित्यैत्वा मामेक्षेष्ठा अमुत्रामुष्मिंल्लोके। अन्वाहार्यमासन्नमभि
मृशति॥यजमानः॰ इदं॰ स्थाल्यमृतस्य पूर्णा सहस्रधार उत्सो अक्षीयमाणः।स
दाधार पृथिवीमंतरिक्षं दिवं च तेनौदनेनातितराणि मृत्युं॥प्रजापतेर्भागो॰ लोकाअं
तर्वेद्यन्वाहार्यमासन्नमभिमृशति॥अध्वर्युः।दक्षिणासन्ध्युपहर्तवै।संप्रेष्यति॥य
जमानः।दक्षिणातएतेब्राह्मणाःअयंवओदनोयथाभागंप्रतिगृह्णीध्वं।संप्रेष्यति॥द हेरव
क्षिणांप्रतिग्रहीष्यन्त्सदस्यर्त्विक्त्वोपौन्यात्।व्याहृत्याप्रतिग्रहणं।देवस्यत्वास०।अग्ने ३२
प्रतिगृह्णामि राजा त्वा वरुणो नयतु देवि दक्षिणे ब्राह्मणाओदनं तेनामृतत्वमश्यां वयो

यत्रे श्रयान्मयोमत्थमस्तु प्रतिग्रही त्रा॰ क इदं कस्मा अदात् कामः कामायादात् कामो दाता
कामः प्रतिग्रहीता कामं समुद्रमाविश कामेन त्वा प्रतिगृह्णामि कामैतत्ते एषा ते का
मद्दक्षिणो ज्ञानस्त्वांगीरसः प्रतिगृह्णातु । अन्वाहार्यं चतुर्धा करणक्रमेण प्रतिग्र
ह्य प्रस्थापयेति । ब्रह्मापि स्वमार्गेणागत्वा प्रतिगृह्यागत्योपविशेत् । अध्वर्युः हविः
शेषान् ... । अनुयाजार्थं उल्मुके अपि सृज्य ब्र
ह्मेषान्तु ह्वास्य । अनुह्वासने ततं मआ पद्त्वा हुः । अन्वयाजार्थे उल्मुके अपि सृज्य ब्र
ह्मन्प्रस्थास्यामः समिधमाधायाग्नीत्परिधीँ श्चाग्निं च सकृत्सकृत्संमृड्ढि । संप्रेष्य
ति ॥ ब्रह्मा - देव सवितरेतत्ते प्राह तत्प्रचसुव प्रच यज बृहस्पतिर्ब्रह्मा स यज्ञं पाहि स
स यज्ञपतिं पाहि । यज्ञपतिं पाहि । ॐ प्रतिष्ठ । आग्नीध्रः - एषा ते अग्ने समित्तया वर्द्धस्व चा च प्यायस्व व
र्धितां च ते यज्ञपतिरा च प्यायताꣳ स्वाहा । समिधमादधाति ॥ यजमानः - अग्नय इदं ।
एषा ते अग्ने समित्तया वर्धस्व चा च प्यायस्व वर्धिषीमहि च वयमा च प्यासिषीमहि ।

ह॰ द॰ प्र॰ यत्ते अग्न आतुरुच्या म्यहं वाऽसि पितृश्चरर्ण प्रजां च तस्य मूलं च नि चैर्दवा निर्वक्षः स्व
स्ता अग्ने यो नोऽभिदासंति समानो यश्च निष्ट्यः। इध्मस्येव प्रक्षायतो मा तस्योच्छेषि किं
३३ चना यो मा द्वेष्टि जातवेदो यं चाहं द्वेष्मि यश्च माम्। सर्वा ९ स्तानग्ने संदहया ९ श्चाहं द्वेष्मि
ये च माम्। अनूयाज समिध मा धीयमानो॥ आग्नीध्रः अस्येरि ध्मसंनहनैरपरि काम
न्यरिधीन्त्संमार्ष्टि। मध्यममुर्द्वं पांचा विततो। अग्ने वाजजिद्धाजं त्वा ससृवा ९ संवा
जं जिगिवा॥ ९ संवाजिनं वाजजितं वाजजित्यायै संमार्ज्म्यग्निमन्नादमन्नाद्याय। सकृ
द्दक्षिणं। यो भूतानामधिपती रुद्रस्तंतिचरो वृषा। पशूनस्माकं माहिं ९ सीरेतदस्तु हुतं हरव
तव स्वाहा। य। सेकं देग्नि॥ संमार्गेण भ्युक्ष्याहवनीये प्रहरति॥ यजमानः भूतानाम
धिपतये रुद्राय तंतिचराय वृष्णे। वेदिर्बर्हिः शृतं ९ हविरिध्मः परिधयः स्रुचः। आज्यं ३३
यज्ञस्त्वचो यजुर्यो ग्यावषट्काराः संमसंभृत यान मंतानिध्मसंनहने हुते। इध्म

अंगिर०रहोषु०।

सेनहन्नेहुतेजपति॥ मुहाहे विहोंता। सुत्यहे विरध्वर्युः। अच्युतपाजा अग्नीत्। अच्यु
तमनाउपवक्ता। अनाधृष्यश्चाप्रतिधृष्यश्च यज्ञस्याभिगरौ। अयास्य उद्गाता। सप्त
होतारं पुरस्तात्स्याजानो व्याचक्षीत॥ अध्वर्युः यदुपस्त्याज्यं तज्जुह्वामानी यतेनैस ६
कृदतिक्रांतस्त्रीनन्नूयाजान् यजति। आश्राव्य प्रत्याश्राविते· देवान्यज। प्रथमं संप्रे
ष्यति। वषट्कृते स्रेणाघारसंभेदं पश्चात्पश्चात्समि। धिजुहोति। पश्चाद्देवान्स्य प्राचस
त्तमं संततं तेनेत्तरावनुसंभिनत्ति॥ यजमानः अग्नयइदं। बर्हिषोहं देवयज्यया
प्रजावान्भूयासं॥ अध्वर्युः आश्राव्य प्रत्याश्राविते· यज। संप्रेष्यति। वषट्कृते जुहो
ति॥ यजमानः अग्नयइदं। नराशंसस्याहं देवयज्यया पशुमान्भूयासं॥ अध्वर्युः
आश्राव्य प्रत्याश्राविते· यज। संप्रेष्यति॥ यजमानः अग्नय इदं। अग्नेः स्विष्टकृतोहं
[illegible] नेनप्रतिष्ठां गमेयं। अंगिरसोमास्यय त्तस्य प्रातरनुवाके रहौं।

द·प्र· ष्टुः। अन्तयाजेषु जपति॥ अध्वर्युः प्रस्तरात् प्रयथायतन ॽ स्रुचौ सादयित्वा वा
३४ ज्यवतीभ्यां स्रुहस्तुभौ वाजवत्यौ जपतः। वाजस्य मा प्रसवेनोद्ग्राभेणोदग्रभीत्। दक्षि
णेनैतानि नसपत्नान् जुहूमुद्गृह्णाति। अथा सपत्ना ॽ इन्द्रो मे निग्राभेणाधरा ॽ
अकः। नीचा सव्येनोपभृतं निगृह्णाति॥ उद्ग्राभं च। केवलां जुहूमुद्गृह्णाति॥ निग्रा
भं च॥ उपभृतं निगृह्णाति॥ ब्रह्म देवा अवीवृधन्। दक्षिणेनानेन प्राचीं जुहूं प्रोहति
॥ अथा सपत्नां निंद्राग्नी मे विषूचीनान् व्यस्यताम्। सव्येनोपभृतं प्रतीचीं बहिर्वेदि नि
रस्यति॥ अपउपस्पृश्य· अभ्युक्ष्यो प्रस्तरमाहत्य जुहूपरिधीनक्ति· वसुभ्यस्त्वा हेरव
। मध्यमं॥ यजमानः· वसुभ्य इदं०। वसून्देवान् यज्ञेनापिप्रेयं॥ अध्वर्युः· रुद्रे ३४
भ्यस्त्वा दक्षिणार्ध्यं॥ यजमानः· रुद्रेभ्य इदं०। रुद्रान्देवान् य० यं॥ अध्वर्युः आदि
त्येभ्यस्त्वा। उत्तरार्ध्यं॥ यजमानः आदित्येभ्य इदं०। आदित्यान्दे० प्रेयं। परिधीन

ज्यमानान्म॥ अध्वर्युः॰ अंक्तसत्वज्जुहूं सादयित्वा॰ सं जानाथां द्यावापृथिवी मित्रा
वरुणौ त्वा वृष्ट्यावतां। विधृतीभ्यां प्रस्तरं सम्। त्रिष्पतत्स्नी बर्हिषि विधृती अपि
सृज्य॥ स्रुक्षु प्रस्तरमनक्ति॥ अक्तं रिहाणाः। जुह्वामग्राणि। वियन्तु वयः। उप
भृतमध्यानि॥ प्रजां योनिं मा निर्मृक्षं। ध्रुवायां मूलानि॥ एवं पुनरक्ति। तृतीये तु॰
प्रजां योनिं मा निर्मृक्षं। ध्रुवायां मूलानि॥ वियन्तु वयः। उपभृति मध्यानि॥ अक्तं
रिहाणाः॥ जुह्वामग्राणि॥ यजमानः॰ समङ्क्तां बर्हिर्हविषा घृतेन समादित्यै
र्वसुभिः सं मरुद्भिः। समिन्द्रेण विश्वेभिर्देवेभिरङ्क्तां दिव्यं नभो गच्छतु यत्स्वाहा॥ प्र
स्तरमज्यमाने॥ अध्वर्युः॰ आयुषे त्वा॥ अक्तस्य तृणमपादाय प्रस्तात्तं निधाय॥ य
जमानः॰ ॐ पिप्रे अग्नौ यज्ञमया द्देवा अरंकृतः सोमः। तं मित्रो वरुणो अर्यमा
रायस्पोषाय यजमाने विशंतु। प्रस्तरस्य तृणमपात्ते॥ अध्वर्युः प्रस्तरं शाखां चा

हे॰द॰प्र॰ ह्यायोत्तरं परिधिसंधिमन्ववहृत्याञ्याव्यप्रत्याश्राविते· इषितादेव्या होतारोभद्रवाच्या
यप्रेषितोमानुषः सूक्तवाकायसूक्ता२ब्रू२हिसंप्रेष्यति॥आप्यायंताभापुओषध
३५ योमरुतांपृषत्तयः स्थदिवंगच्छततोनोवृष्टि मेरयस्वाहा।प्रस्तर५शास्वांचानुप्रह
रति।अजिह्मंमिवहस्तेधारयन्कर्षन्निवन्यंचमेततः पर्यावर्तयति॥यजमानः
अग्नयइदं०।अग्नेरहमुज्जितिमनूज्जेषं॥सोमायेदं०।सोमस्याहमुज्जितिम
नूज्जेषं॥अग्नेरहमुज्जितिमनूज्जेषं।प्रजापतयइदं०।प्रजापतेरहमु०।अग्नी
षोमाभ्यामिदं०।अग्नीषोमयोरहमु०।इंद्रायवैमृधायेदं०।इंद्रस्यवैमृधस्याहमु
०।इंद्राग्निभ्यामिदं०इंद्राग्नियोरहमु०।देवेभ्यआज्यपेभ्यइदं०।देवानामाज्यपाना हरव
महमु०।अग्नयेस्विष्टकृतइदं०।अग्नेःस्विष्टकृतोहमु०।अध्वर्युः-आशास्तेयंय ३५
जमानोसावि सुच्यमाने०अग्नीदूमयासंप्रेष्यति॥आग्नी ध्रस्त्रिरंजलि नाप्रस्त

मुर्ध्वमुद्यौति॥ यजमानः यर्हि होता यजमानस्य नाम गृह्णीयात्तर्हि ब्रूयात्। एमा
अग्मन्नाशिषो दोहकामा इंद्रवंतो वनामहे धुक्षीमहि प्रजामिषं। सा मे सत्याशीर्देवेषु भू
यात्मन्यान्मन्यैतमा ऋतु घा ऋतु र्ह तुमा रैऽता मनसा तच्छकेयं यज्ञो दिवं रोहतु यज्ञो
दिवं गच्छतु यो देवयानः पंथास्तेन यज्ञो देवाँ अप्येतु। आशीष्यु जपति। यज्ञो मुआ
गंस्यात्। यत्कामयते तस्य नाम गृह्णाति॥ रोहितेन त्वाग्निर्देवतां गमयतु हरिभ्यां
त्वेंद्रो देवतां गमयतु। एतशेन त्वा सूर्यो देवतां गमयतु। प्रस्तरमवसृजं॥ अध्वर्युः अ,
नुप्रहर। संप्रेष्यति॥ आग्नीध्रः स्वगा तनुभ्यः स्वाहा। प्रस्तरस्य तृणमपात्तमनुप्रह
रति॥ यजमानः तनुभ्य इदं। दिवः खीलो वर्ततः पृथिव्या अभ्युत्थितः। तेना सहस्रकांडे
न द्विषंतं तापयामसि द्विषन्नस्ताप्यनो बहु मानागास्ताप्यो वधैः। प्रस्तरस्य तृण
मनुप्रहृतं॥ अध्वर्युः एतात्र एतत्र एतदिति त्रिरंगुल्या त्वदिशति॥ आयुष्या अंग्ने

त

ह॰द॰भ॰ स्यायुर्मे पाहि ध्रुक्षस्त्ध्या अग्ने सिचस्तुं मे पाहि । इत्याज्यपात्राणि संन्यस्यति ॥ ध्रुवास्ति ।
३६ अंतर्वेदि पृथिवीमभिमृशति ॥ आग्नीध्रः संवदस्व ॥ अध्वर्युः अगानग्नीत् ॥ आग्नीध्रः अगन्
॥ अध्वर्युः श्रावय ॥ आग्नीध्रः श्रौ३षट् ॥ अध्वर्युर्मध्यमं परिधिमन्वारभ्य स्वगा दैव्या हो
तृभ्यः स्वस्तिर्मानुषेभ्यः शंयोर्ब्रू३हि । संप्रेष्यति ॥ यजमानः विष्णोः शंयोरहं देवयज्यया
यज्ञेन प्रतिष्ठां गमेयं । शंयुवाकं ॥ अध्वर्युः यं परिधिं पर्यधत्था अग्ने देव पणिभिर्गुह्यमा
णः । तं त एतमनु जोषं भराम्येष नेदेष त्वदपचेतयातै । स्वाहेति इति । मध्यमं परिधिमनुप्र
हरति ॥ संस्रवस्य पात्र उपसमितं । स्वाहेति दक्षिणः । इतरौ । अवांचमुत्तरस्याग्नेरंगारेष्वपोहर
ति ॥ यजमानः वि ते मुंचामि रशना वि रश्मीन्वियोक्त्रा यानि परिचर्तनानि । धत्तादस्मासु
द्रविणं यच्च भद्रं प्रणो ब्रूताद्भागधां देवतासु । अग्निपरिधिषु प्रहृतेषु समापोषु ॥ अध्वर्युः हेरव
यजमानेन्यथत । परिधीननुमेच्चयते ॥ उत्तानाभ्यां हस्ताभ्यामिति वृत्तिः ॥ जुहामिति उप ३६

स्तोग्नमवधाय॰ सं स्त्राव भागास्थेषा बृहंतः प्रस्तरेष्ठा बर्हिषदश्च देवा इमां वाचम
भि विश्वे गृणंत आसद्यास्मिन् बर्हिषि मादयध्वं स्वाहा। स्रुचौ प्रस्तावयति॥ यजमान
वसुभ्यो रुद्रेभ्य आदित्येभ्यः सं स्त्रावभागेभ्य इदं॰। हुत्वोपभृतो भ्रग्रे निर्द्दिविपणोद्यति भिरा
शीर्वसुभिरा शीर्वां अथर्वभिः। तस्मै मेह स्यवीत स्युद्रविणमा गम्यादस्मैधेनो वसे
मा न्यपुत्तस्य सयस्त स्यव सो वसुमतो वस्विहागच्छतु यत्तोम आगच्छतु। सं स्त्रा
वभागाननुमंत्रयते॥ यत्काम यते तस्य नाम गृह्णाति॥ वेदोसि वित्तिरसि पाप्मनो स्या
हत्यै विदेयकर्मासि करुणं मसि क्रियासं सनिरसि सनितासि सने घृतवंतं कुला
यिनं रायस्पोषं सहस्रिणं वेदो ददातु वाजिनं। वेदं मंतर्वेद्यासन्नमभिमृशति॥ स्रुचि
जो हविः प्रोषान्या ज्यस्यालेपान्प्रक्षाल्य॥ जुहूपभृताव ध्वर्युरादत्ते। वेदं होता। सस्रु
नामाज्यस्थालीमाग्नीध्रः प्रत्यंचोयंति पत्नीः संयाजयिष्यंतो दक्षिणेन गार्हपत्यमध्वर्यु

८

द.प्र. रतिक्रामत्युत्तरेणेतरौ। अध्वर्युः अग्ने वीरमपन्नगरहस्तुसदंसि सादयामि सुम्नायसु
३० म्निनी सुम्ने मा धत्तं धुरि धुर्यौ पातं॥ स्फ्यस्रुचौ सादयति॥ अपरेण गार्हपत्यमुपविश्य
ध्याने नैव स्रुग्भ्यां पत्नीः संयाजयंति। वेदं चोपभृत्य पत्न्यामन्वारब्धायां जुह्वां चतुर्गृ
हीतं गृहीत्वा सोमायानुब्रूहि। आश्राव्य प्रत्याश्राविते सोमं यज। संप्रेष्यति। वषट्
कृते उत्तरार्धे सोमं यजति॥ यजमानः सोमायेदं०। सोमस्याहं देवयज्यया सुरेता रेतो
धिषीय॥ अध्वर्युः त्वष्ट्रेनुब्रूहि। आश्राव्य प्रत्याश्राविते त्वष्टारं यज। वषट्कृते द
क्षिणार्धे त्वष्टारं यजति। तावंतरेणेतरा यजति॥ यजमानः त्वष्ट्र इदं०। त्वष्टुरहं देवयु
ज्यया पशूनां रूपं पुषेयं॥ अध्वर्युः देवानां पत्नीभ्योनुब्रूहि। परिश्रिते देवानां प हेरंब
त्नीर्यज॥ यजमानः देवानां पत्नीभ्य इदं०। देवानां पत्नीनामहं देवयुज्यया प्रजातिषीय ३०
प्रजयाश्च पशुभिश्च॥ अध्वर्युः राकाया अनुब्रूहि। राकां यज॥ यजमानः। राकाया इ

दं०॥ राकायाअहं देवयज्यया प्रजावान्भूयासं॥ अध्वर्युः- सिनीवाल्या अनुब्रूऽहि। सि
नीवालीं यज॥ यजमानः- सिनीवाल्या इदं०। सिनीवाल्या अहं देवयज्यया पशुमान्भूया
सं॥ अध्वर्युः- अग्नये कुह्वा अनुब्रूऽहि। कुहूं यज॥ यजमानः- कुह्वा इदं०। कुह्वा अहं देव
यज्यया पुष्टिमान्भूयासं॥ अध्वर्युः- अग्नये गृहपतये नुब्रूऽहि। अग्निं गृहपतिं यज॥
यजमानः- अग्नये गृहपतय इदं०। अग्निर्गृहपतिर्यज्ञस्य प्रतिष्ठा तस्याहं देवयज्यया
प्रतिष्ठावान्भूयासं। देवानां पत्नीरग्निर्गृहपतिर्यज्ञस्य मिथुनं तयोरहं देवयज्यया मि
थुनेन प्रभूयासं। इति समस्तानुमंत्रणमेके समामनंति॥ अध्वर्युः- संपत्नी पत्या सुकृ
तेन गच्छतां यज्ञस्य युक्तौ धुर्यावभूतां। संजानानौ विजहतामरातीर्दिवि ज्योतिरजरमा
रभेतां स्वाहा। स्रुवेण गार्हपत्ये संपत्नीयं जुहोति। पत्न्या मन्वारब्धायां॥ यजमानः
दिवि ज्योतिषं परमात्मन इदं०॥ अध्वर्युः- पर्वेण वत्सोत्तरं गुलिपर्वेणी अनक्ति। दक्षिणे

द॰प॰ होतुः पाणौ चतुरआज्यविंदून् निज्ञामवद्याति। पत्न्यग्नीध्रः। उपहूयमानामध्वर्युराग्नी
१८ ध्रः पत्नीचान्वारंभेते। दैव्याअध्वर्यवइत्युच्यमाने॰ उपहूतः पशुमानसानि। जपति॥य
जमानः इडोस्मानन्नुवस्तां घृतेनयस्याःपदे पुनते देवयंतः। वैश्वानरीशक्वरीवावृधानो
पस्तमस्थिन्त वैश्वदेवी। आज्येडामनुमंत्रयते॥ पत्नीउपहूतोयं यजमानइत्युच्यमाने॰
उपहूता पशुमास्यसानि। जपति॥ आग्नीध्रः उपहूतो द्यौः पितोपमां द्यौःपिताह्वयताम्
ग्निराग्नीध्रादायुषेनर्वे सेजोवा त्वे पुष्प्याय। आज्ये डांप्राश्नाति। प्राश्यतूष्णीं मार्जयते॥
अध्वर्युः॰ दक्षिणाग्नाविध्मप्रवृश्च नान्वाधायपश्चिमे पत्नीकरणहोमौजुहो
ति॥ चतुर्गृहीताज्येफत्नीकरणानोप्य॰ अग्नेदब्धायोशीततनोपाहिमाद्यदिवःपा ॥हरव॥
हिप्रसित्यैपाहिदुरिष्ट्यैपाहिदुरद्मन्यैपाहिदुश्चरितादविषंनःपितुंकृणुसुषदायो ३९
निं स्वाहा। यजमानः॰ अयासरस्वतीयशोभगीनातस्येतिस्वाहा। हुत्वेसुस्वंफत्नीकर

णो हूयमाने मुखं विम्रष्टे। अग्नये ऽदब्धायवे। शीततनव इदं०। यां सरस्वती वेशभगीना
तस्येते स्वाहा। हुते मुखं विम्रष्टे॥ अध्वर्युः· अपरं चतुर्गृहीतं गृहीत्वा· पिष्टलेपमोप्य· उ
लूखले मुसले च यच्च शूर्पे आशिश्लेष दृषदि यत्कपाले। अवप्रुषो विप्रुषः संयजा
मि विश्वेदेवा हविरिदं जुषंतां यज्ञे या विप्रुषः सेतिबु द्वी रग्नौ ताः सर्वाः स्विष्टाः सुहुता जु
होमि स्वाहा। स्वरो न भवति। पिष्टलेपं जुहोति॥ यजमानः· विश्वेभ्यो देवेभ्य इदं·। वेदोसि
वित्तिरसि० सनेयं। वेदं होता पत्न्यै प्रदीयमाने· घृतवंतं कुलायिनं रायस्पोषं सह
स्त्रिणं वेदो ददातु वाजिनं। उपस्थे स्यमाने·। निर्दहंतं निरराति नुदा। वेदं पत्नी निरस्यते॥
अध्वर्युः स्रयोक्त्रं जत्नी पूर्णपात्रमानयति· समायुषा सं प्रजया समग्ने वर्चसा पुनः
।सं पत्नी पत्या हं गच्छे समात्मा तनुवा मम। पत्न्यानीयमाने जपति ततः सा। निनीयमु
खं विम्रज्य यथार्थं गच्छति॥ यजमानः· त्वया वेदिं विविदुः पृथिवीं त्वया यज्ञो जायते

द॰ म विश्वदानिः। अच्छिद्रं यज्ञमन्वेषि विद्वान्त्वया होता संतनोत्यर्धमासान्। वेद ५ स्तीर्य
१९ माणां॥ यथेतमध्वर्युरेत्य। आप्यायताद्भिः। अयासरस्वतीयशोभगीनातस्यैतेस्वाहा॥ आ॰ दर्वीयं
यजमानः सरस्वत्यै यशोभगीनाया इदं०॥ अध्वर्युः यासरस्वती वेशभगीनातस्यै
तेस्वाहा॥ यज॰ सरस्वत्यैवेशभगीनाया इदं०। अध्वर्युः पुनः सकृद्गृहीत्वा इंद्रोपान
स्यकेहमनसो वेशान्कुरुसुमनसः सुजातान्स्वाहा। इंद्रायेदं०। अध्वर्युः स्रुवेण पार्व
णो होमौ जुहोति। पुरस्तात्स्विष्टकृतो वा। सुषमं वाजिनं वयं पूर्णमासं यजामहे। सनो
दोहतां५ सुवीर्य५ रायस्पोष५ सहस्त्रिणं प्राणाय सुराधसे पूर्णमासाय स्वाहा। पू
र्णमासायेदं०॥ इति पौर्णमास्यां॥ अमावास्या सुभगा सुशेवा धेनुरिव भूय आप्यायमाना। सानो दोहतां५ सुवीर्य५ रायस्पोष५ सहस्त्रिणम पानाय सुराधसे मावास्यायै स्वाहा। अमावास्याया इदं० इत्यमावास्यायां॥ अध्वर्युः आप्यायतां षट्॥ खंडे त्रिषु हेरव ३९

पुरस्तात्स्विष्टकृतोऽन्यत्र विकल्पः। दश ते तनुवो यज्ञ यज्ञियास्ताः प्रीणातु यजमानो
घृतेन। नारिष्ठयोः प्रशिषमीडमानो देवानां दैव्येपि यजमानोऽमृतोऽभूत् स्वाहा। नारि
ष्ठाभ्यामग्निवायुभ्यामिदं०। यं वां देवा अकल्पयन्नूर्जो भागꣳ शतक्रतू एतद्वां ते
नेप्रीणानि तेन तृप्यतमꣳ हहौ स्वाहा। नारिष्ठाभ्यामग्निवायुभ्यामिदं०॥ अहं देवाना
ꣳ सुकृतामस्मिँल्लोके ममेदमिष्टं न मिथुर्भवाति। अहं नारिष्ठावनु यजामि विद्वा
न्यदाभ्यामिदं हो अदधात् भागधेयꣳ स्वाहा। नारिष्ठाभ्यामग्निवायुभ्यामिदं०॥ अदा
रसृद्भवत देव सोमास्मिन्यज्ञे मरुतो मृडता नः। मा नो विदद्भिभा मो अशस्तिर्मा
नो विदद्वृजना द्वेष्या याः स्वाहा। नारिष्ठेभ्यो देव सोम मरुद्भ्य इदं०॥ ब्रह्म प्रतिष्ठा म
नसो ब्रह्म वाचो ब्रह्म यज्ञानाꣳ हविषामाज्यस्य। अतिरिक्तं कर्मणो यच्च हीनं यज्ञस्य

... यन्त्वा हा कृता हुति रेतु देवान्त्स्वाहा। ब्रह्मण इदं०॥ सं ते म

र.प्र. नः संप्राणे प्राणं दधामि तत्संव्याने स समानं दधामि ते॥ पुरिष्ट त्वं यजमानोऽन्तरो
४० मूर्च्छं नेऽधिद्विपदे शंचतुष्पदे स्वाहा॥ नारिष्टाय परमात्मन इदं० अध्वर्युः आप्या
यतां अष्टत्रिंशद्धही त्वा जुह्वाह वनी ये सर्व प्रायश्चित्तानि जुहोति। इष्टेभ्यः स्वाहा। इष्टे
भ्य इदं०॥ वषड्निष्टेभ्यः स्वाहा। वषड्निष्टेभ्य इदं०॥ भेषजं दुरिष्ट्यै स्वाहा। भेषजं दु
रिष्ट्या इदं०॥ निर्ऋत्यै स्वाहा। निर्ऋत्या इदं०॥ निष्कृत्यै स्वाहा॥ निष्कृत्या इदं०॥ दौराध्यै अ.प.प्र.
स्वाहा। दौराध्यै इदं०॥ दैवीभ्यस्तनूभ्यः स्वाहा। दैवीभ्यस्तनूभ्य इदं०॥ ऋद्ध्यै स्वाहा
। ऋद्ध्या इदं०॥ समृद्ध्यै स्वाहा। समृद्ध्या इदं०॥ अयाश्चाग्नेऽस्यनभिशस्तीश्च सत्यमि
त्वमया असि। अयसा मनसा धृतोऽयसा हव्यमूहिषे या नो धेहि भेषजं स्वाहा। अ ॥हेरव॥
ग्नये अयस इदं०॥ इमं मे वरुण श्रुधी हवमद्या च मृडय। त्वामवस्युराचके स्वाहा। वरु ॥४०॥
णायेदं०॥ तत्त्वा यामि ब्रह्मणा वन्दमानस्तदाशास्ते यजमानो हविर्भिः। अहेडमानो

वरुणेह बोध्युरुशं स मा न आयुः प्रमोषीः स्वाहा। वरुणायेदं०। त्वं नो अग्ने वरुणस्य
विद्वान्देवस्य हेडो ऽवयासिसीष्ठाः। यजिष्ठो वह्नितमः शोशुचानो विश्वा द्वेषांसि प्रमुमु
ग्ध्यस्मत्स्वाहा। अग्नीवरुणाभ्यामिदं०। स त्वं नो अग्ने ऽवमो भवोती नेदिष्ठो अस्या उषसो
व्युष्टौ। अव यक्ष्व नो वरुणं रराणो वीहि मृडीकं सुहवो न एधि स्वाहा। अग्नीवरुणा
भ्यामिदं। त्वमग्ने अयास्ययासन्मनसा हितः। अया सन्हव्यमूहिषे या नो धेहि भेषजं
स्वाहा। अग्नये अयस इदं०। प्रजापते न त्वदेतान्यन्यो विश्वा जातानि परि ता बभूव। यत्का
मास्ते जुहुमस्तन्नो अस्तु वयं स्याम पतयो रयीणां स्वाहा। प्रजापतय इदं०। भूः स्वा
हा। अग्नय इदं०। भुवः स्वाहा। वायव इदं०। सुवः स्वाहा। सूर्यायेदं०। भूर्भुवः सुवः स्वाहा।
प्रजापतय इदं०। आश्रावितमत्याश्रावितं वषट्कृतमत्यनूक्तं मे नूक्तं च यज्ञे। अतिरिक्तं न
कर्मणो यच्च हीनं यज्ञः पर्वाणि प्रतिरन्नेति कल्पयन्स्वाहा। कृता हुति रे तु देवान्स्वाहा।

रु.द्र.प्र. पत्ताये इदं ०।अनाज्ञातं यदाज्ञातं यज्ञस्य क्रियते मिथु।अग्ने तदस्य कल्पय त्वं हि वे
४१ त्थ यथातथं स्वाहा कृताहुतिरेतु देवान्स्वाहा॥ अग्नय इदं ०। अतिरिक्तं न्यूनं जुहो
मि न्यूनमतिरिक्ते जुहोमि। समं समे जुहोमि स्वाहा कृताहुतिरेतु देवान्स्वाहा। देवेभ्य
इदं ०। यद्कर्मयज्ञात्कर्मे यदत्यगाम यज्ञात्यगाम यदत्यरीरिचाम यज्ञात्यरीरिचा
म तत्वं विष्णो यज्ञे यज्ञे प्रतिष्ठापय स्वाहा कृताहुतिरेतु देवान्स्वाहा। देवेभ्य इदं ०। यत्स
मत्तांतरगाम किंचिदस्मिन्यज्ञे मे च तत्कर्मतो वा। अनया हुत्या तच्छमयामि सर्वं तर्पं
तु देवा हविषो घृतस्य स्वाहा कृताहुतिरेतु देवान्स्वाहा। देवेभ्य इदं ०॥ ब्रह्म प्रतिष्ठा ०न्स्वा हेरव
हा। ब्रह्मण इदं ०। ततं म आपस्तदु तायते पुनः स्वादिष्ठा धीतिरुचथाय शस्यते। अयं
समुद्र उत विश्वभेषजः स्वाहा कृतस्य समृत्तप्पुत मयोभुवः स्वाहा। त्रुभ्य इदं ०। उद्वयंत ४१
मसस्परि पश्यंतो ज्योतिरुत्तरं। देवं देवत्रा सूर्यमगन्म ज्योतिरुत्तमं स्वाहा॥ स्व

र्यायेदं॰। उदुत्यंजातवेदसंदेवंवहंतिकेतवः। दृशेविश्वायसूर्यं॥ स्वाहा। सूर्याये
दं॰। चित्रंदेवानामुदगादनीकंचक्षुर्मित्रस्यवरुणस्याग्नेः। आप्राद्यावापृथिवीअंत
रिक्षं॥ सूर्यआत्माजगतस्तस्थुषश्चस्वाहा। सूर्यायेदं॰। यद्देदिवाअतिपादयानि
वाचाचित्त्यायतदेवहेडनं। अरावोअस्मा॥ अभिदुच्छुनायतेतस्मिन्तन्मरु
तस्तन्निधेतनस्वाहा। मरुभ्यइदं॰। यतइंद्रभयामहेततोनोअभयंकृधि। मघ
वञ्छग्धितवतन्नऊतयेविद्विषोविमृधोजहिस्वाहा। इंद्रायमघवतइदं॰। स्व
स्तिदाविशस्पतिर्वृत्रहाविमृधोवशी। वृषेंद्रःपुरएतुनःस्वस्तिदाअभयंकरःस्वा
हा। इंद्रायवृत्रघ्नइदं। आभिर्गीर्भिर्यदतोनऊनमाप्याययहरिवोवर्धमानः। यदा
स्तोतृभ्योमहिगोत्रारुजासिभूयिष्ठभाजोअधतेस्यामस्वाहा। इंद्रायहरिवतइदं॰।
अर्वतिहेडोवरुणनमोभिरवयज्ञेभिरीमहेहविर्भिः। क्षयन्नस्मभ्यमसुरप्रचेता

द्र. प्र. एनुत्रेना ँ सिशिश्रथः कृतानि स्वाहा। वरुणायेदं०। उदुत्तमं वरुण पाशमस्मदवा
४३ धमं वि मध्यमं श्रथाय। अथा वयमादित्य व्रते तवानागसो अदितये स्याम स्वाहा। व
रुणायेदं०। पुरुषसंमितो यज्ञो यज्ञः पुरुषसंमितः। अग्ने तदस्य कल्पय त्वं हि वेत्थ
यथातथं स्वाहा। कृताकृति रेतु देवान्स्वाहा। अग्नय इदं०। यत्पाकत्रा मनसा दीनदक्षा
न यज्ञस्य मन्वते मर्तासः। अग्निष्टद्धोता क्रतुविद्विजानन्यजिष्ठो देवाँ ऋतुशो
यजाति स्वाहा। अग्नय इदं०। अध्वर्युः। आप्यायतां ध्रुवा मा प्याय्य। देवा गातुविदो गा
तुं वित्त्वा गातुमित मनसस्पत इमं नो देव देवेषु यज्ञं स्वाहा वाचि स्वाहा वाते धाः स्वा
हा। अंतर्वेद्यूर्ध्वस्तिष्ठन् ध्रुवयाहवनीये त्रीणि समिष्टयजूंषि जुहोति। मध्यमे हेरव
स्वाहाकारे बर्हिरनुप्रहरति। यजमानः दिवेभ्यो गातुविद्भ्यो यज्ञाय परमात्मन इदं
०। अग्नेरदब्धायो शीततनो ० यो नि ँ स्वाहा। समिष्टयजुरनुमंत्रयते। द्विषः स्वी ४२

लोर्वततः पृथिव्या अध्युत्थितः। तेनास्य हस्तकांडेन द्विषंतं शोचयासि द्विष
न्नेनु हुशोचतोर्णधेमो अहं स्वउचे। वर्हिरनुप्रहरतं॥ संयुक्त पतिराशिषां। यजमान
भागं प्राश्नाति॥ इदं हविः प्रजननं मे अस्तु दशवीरं सर्वगणं स्वस्तये। आत्मस
निप्रजासनि पशुसन्यभयसनि लोकसनिरस्थिसनि। अग्निः प्रजां बहुलां मे करो
त्वन्नं पयो रेतो अस्मासु धत्तरायस्पोषमिषमूर्जमस्मासु दीधरत्स्वाहा इदं तस्य॥ दधि
क्राव्णो अकारिषं जिष्णोरश्वस्य वाजिनः। सुरभि नो मुखाकरत्प्रण आयूंषि ता
रिषत्। रक्षः॥ अध्वर्युः॥ अग्निस्त्वर्णो हि परिधि हि वेदिं जामिं मा हिंसी रमुया शा
योना॥ होतृषदना हरिताः सुवर्णा निष्का इमे यजमानस्य ब्रध्ने। होतृषदने वेदि
मभिस्त्वर्णाति॥ पोषायचः। अग्नेणा हवनीयं प्रणीताः पर्याहत्य॥ योवो योक्षी
त्स वो वि मुंचतु। अंतर्वेदि विमुंचति॥ तास्तु संततामुदकधाराः स्रावयति॥ यज

हे०द०प्र० मानः॥सदसि सन्मेभूयाः सर्वमसि सर्वं मेभूयाः पूर्णमसि पूर्णं मेभूयाअक्षि

तमसि मा मेक्षेष्ठाः।आनीयमाना सुजपति॥ प्राच्यां दिशि देवाऋत्विजोमार्जय

४३ तां।दक्षिणायां दिशि मासाः पितरो मार्जयतां।प्रतीच्यां दिशि गृहाः पशवो मार्जयं

तां॥ उदीच्यां दिश्यापओषधयो वनस्पतयो मार्जयंतां। ऊर्ध्वायां दिशि यज्ञः संव

त्सरो यज्ञपतिर्मार्जयंतां। प्रतिदिशं व्युत्सिंचति॥ समुद्रं वः प्रहिणोम्यक्षिताः

स्वांयोनिमपिगच्छत।अच्छिद्रः प्रजयाभूयासं मापरासेचि मत्पयः॥ योवनिन

यति॥यदप्सुते सरस्वति गोष्वश्वेषु यन्मधुतेन मे वाजिनीवति मुखमंग्धि सर

स्वति। मुखं विमृष्टे॥अध्वर्युः यंदेवा मनुष्येषूपवेषमधारयन्।येअस्मदपचेत ॥हरवा॥

सस्तानस्मभ्यमिहाकुरु।उपवेषोपविद्धिनः प्रजां पुष्टिमथोधनं। द्विपदो नश्चतु ४३

ष्पदो ध्रुवाननपगा कुरु।उपवेषमादाय॥ योपवेषे विरूढ करसा पां सानं मदनुदयं द्वि

ष्मः । इत्कारेनि खनेत्वा निरस्येहा॥ निः पाप्मानौ निरमुं नुदओकसः सपत्नो यः हंत
न्यति। निर्वाध्येन हविषेइ एषां परांशरीत॥ इहितिस्वः परावत इहिषे चुजना ९ अति
इहितिस्तो तिरोचुना याचुत्सूर्यो असंद्विवि। पुरस्तात्वा परावतःमिंद्रो नयतु रचुहा।
यतो न पुनरायति शश्वतीभ्यः समाभ्यः। हतः पाप्मा वेधि ष्मपाप्मानं॥ कस्त्वा युन
क्ति सत्वा विमुंचतु। यंतं विमुंचति॥ या निघुर्मे कुपास्तांन्यु पविन्वंति विधसेः। पूष्ण
स्ता न्यपिव्रूतइइ द्वा स्व विमुंचता। कुपालानि विमुंचति॥ यथितं मतिनिक्रामति
॥ ब्रह्मा· द्विवोभागो सि॥ ब्रह्मभागं प्राश्य॥ अयाइग्नि जातवेदा अदब्धो अंतरः एवो
अस्मिन्निषद्या सुन्वो स्तनि ९ सुविमुचानो विमुंच धेत्य स्मा सुइणं जातवेदोय
च्छमइं प्रणोयच्छाभिवस्यो अस्मान्त्संनः स्त्रजसुमस्याजवसो॥ समिधमाधा
ययथेतं मतिनिक्रामति। यन्नयानः· अतएवोपोत्थाय· विष्णोः· कर्मै स्तभिमा

ह· प्र· प्रीयौ[illegible] ग्यहोरेवा अतिपारयन्तु त्रिहा गायत्रेण छंदसा पृथिवीमनु[illegible]
४ तुः सपंद्विष्मः। विष्णोः क्रमोस्य भिशास्तिहा त्रैष्टुभेन छंदसांतरिक्षमनुवि० ष्मः। वि
ष्णोः क्रमोस्यरातीयतो हंता जागतेन छंदसा दिवमनुवि०। विष्णोः क्रमोसि शत्रू
यतो हंतानुष्टुभेन छंदसा दिशोनुविक्र० ष्मः। चतुरो विष्णुक्रमान्क्रामति· दक्षिणेन
प्रक्रम्य सव्येनानुप्रक्रामति। तिष्ठंश्चतुर्थं जपति॥ उद्यन्नद्य मित्रमहः सपत्नाल्लेअ
दि नीनशः॥ [illegible]वैनान्प्रियुतां जहि निम्नोचुंनरो धेनुक्रधि। उद्यन्नद्य विनो भज पिता पुत्रे
भ्योयथा। दीर्घायुत्वस्य हेशिषे तस्य नो देहि सूर्य। उद्यन्नद्य मित्रमह आरोहन्नुत्तरां
दिवं। हृद्रोगं मम सूर्य हरिमाणं च नाशय। शुकेषु मे हरिमाणं रोपणाकासु दध्मसि। हेरव
अथो हारिद्रवेषु मे हरिमाणं निदध्मसि। उदगादयम[illegible] यमादित्यो विश्वेन सहसा सहं ॥४॥
ह। द्विषंतं मह्यं रंधयन्मो अहं द्विषतेरधं। यो नः शपादशपतो यश्चनः शपतः शपात्

त। उषाश्चुतस्मैनिम्रुक्तसर्वंपाप५ँसम्रूहतां। योनःसपत्नोयोरणोमर्त्तोभिदास
तिदेवाः। इध्मस्येवप्रक्षायतोमातस्योच्छेषिकिंचन। अगन्मसुवःसुवरगन्मसंदृश
स्तेमाच्छित्सियत्तेतपस्तस्मैतेमावृक्षिसुभूररसिश्रेष्ठोरश्मीनामायुर्धाअस्यायुर्मेधे
हिवर्चोधाअसिवर्चोमयिधेहि। आदित्यमुपतिष्ठते॥ इदमहंपाप्मानंभ्रातृव्यमाभ्यो
दिग्भ्योस्यैदिवोस्मादंतरिक्षादस्यैपृथिव्याअस्मादन्नाद्यान्निर्भजामिनिर्भक्तःसयंद्वि
ष्मः। यंद्वेष्टितस्यवधंमनसाध्यायति। ऐंद्रीमावृतमन्वावर्त्ते। प्रदक्षिणमावर्त्तते॥ पु
ण्याभवंतुयालक्ष्मीःपराभवंतुयाःपापीः। दक्षिणमं५ँसममभिपर्यावर्त्तते॥ तेजोसि
आहवनीयमुपर्यावर्त्तते॥ समहंप्रजयासंमयाप्रजासमहं५ँरायस्पोषेणसंमया
रायस्पोषः। उपतिष्ठते॥ समिद्धोअग्नेमेदीदिहिसमेद्धातेअग्नेदीद्यासं। अग्नयइ-
दं। उपसमिंधे॥ वसुमान्यज्ञोवसीयान्भूयासं। उपतिष्ठते॥ अग्नेवर्चस्वदितंनस्त्व

ह॰प॰ नैये पितुं पच। विश्व ँ शंतो कापतनु वे स्योनैः॥ इक्षि णाग्नि॥ अग्न आय ँ षि पवस
१९ सु आंवोर्जमिषं च नः। आरे बाध स्व दुच्छुनां॥ अग्ने पव स्व स्वपा अस्मे वर्चः सुवीर्यं। दधद्रयिं मयि
ँ रयिं मयि। अग्ने गृहपते सुगृहपतिरहं त्वया गृहपतिना भूयास ँ सुगृहपति र्मया
त्वं गृहपतिना भूयाः शत ँ हिमास्ता माशिषमाशासे। मुकशामै पेज्योतिषमती। गार्हप
त्य। ज्योतिषे तं त्वे ता मुकशामै ज्योतिष्मतीति ज्योतिषमती॥ अंतराग्नी नि धी इति॥ वेदस्य णा
नु पस्य आधाय॰ देवेवायद्ग्रहनेः पृथिव्याम ध्यासते। अग्नि र्मीते भ्यो रक्षतु गच्छेम सु
कृतौ वयं। ये देवा यज्ञमुषः इ॰ वयं। अग्ने प्रमि त्राव रुणा वरे ण्याः राचीं णां भागो युव यो
र्यो अस्ति। ना केस्ता नाः सुकृतस्य लोके स्तत दे हि अधि रो चने दिवः। ये देवा यज्ञहन्
नोंतरिक्षे ध्यासते। वायुर्मीते भ्यो रक्षतु गच्छे॰ वयं। ये देवा यज्ञम पोत॰ ते वा सु॰व हे॰ग॰ ४
यां या स्तु राचीं॰ सवितर्देवयानोरदुराद्यावापृथिवी वि सर्ति। गृहे श्च सर्वे॰ प्रज या न्वस्पे

सुवीरो हणास्तरतारजाꣳसि। ये देवा यज्ञहनो दिव्यध्यासते। स्व यीमा तेभ्यो रक्षतु
गच्छे० वसो। ये देवा यज्ञमुषो दि० येनेन्द्राय समभरः पयाꣳस्युत्तमेन हविषा जातवे
ग्ने दः। तेनात्वमुत वर्धय मꣳ सजातानाꣳ श्रैष्ठ्य आधेनो। अंतर्वैद्यासीनो तीमोक्षा ज्ञप
ति॥ स्वायतनं गत्वा- कुस्त्वा युनक्ति स त्वा विमुंचतु॥ सर्वं मनु वीक्षते॥ अग्ने व्रतपते
व्रतमचारिषं तदशकं तन्मेराधि। वायो० आदित्य० व्रतानां व्रतपते०। व्रतं विसर्जते
यज्ञो वभ्रवसआ वभ्रवसप्रजं से सर्वार ॥: स देवानामधिपति वभ्रवसो अस्माꣳ
अधिपतीन्करोतु वयꣳ स्याम पतयो रयीणां। यज्ञस्य पुनरालंभं जपति॥ गोमाꣳ अ
ग्नेविमाꣳ अश्वी यज्ञो न्नवत्सखा सदमिद्प्रमृष्यः। इडावाꣳ एषो असुर प्रजावान्दी
र्घो रयिः पृथुबुध्नः सभावान्। प्राङ् क्रम्य जपति॥ यस्तेशोचंति यजुर्नभो न मस्यते यज्ञ।
शिवे न मे संतिष्ठस्व स्योने न मे संतिष्ठस्व सुभूते न मे संतिष्ठस्व ब्रह्मवर्चसे न मे संति

१०९.म० मखयुक्तस्युद्धिं मनु संतिष्ठस्वोपर्तेयजुनमु ३ पर्तुन मु ३ पर्तेनमु ३ पर्तेनमः ।ज
मति॥ द्वौ स्वरसि हृश्च मे पाप्मानमस्तात्सत्यमुपागाम स्वश्च्चो। अप ३ प स्वः स्व॥ यथ
४६ सैष दिनिष्क्रामति· ब्राह्मणां स्तर्पयितवै। संप्रेष्यति॥ अग्ने नय सुपथा राये अ
स्मान्विश्वानि देव वयुनानि विद्वान्। युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नम उक्तिं
विधेम॥ मा प्रवः स्वक्रायभान वेमरध्व हव्यं मतिं यागनयनुरतः। सोदैवानि मानुषा
नन्न श्च्युतर्विश्वानि विद्वनाजि गाति। अ- ङ्गिरोभूत योरिद वृयं तीयाग्नि यदि द्रविणं
भिक्षे मापाः। सुसंदृशं सुप्रतीकं स्वंचं हव्यवाहमरतिं मानुषाणां॥ अग्नेत्व हे१०
मस्मद्युयोध्यमीवा अनग्निचा अभ्यमंत कृष्टीः पुनरस्मभ्यं सुवितायदेव क्षां विश्वे
भिरजरेभिर्यजत्र। अग्ने त्वं पारया नव्यो अस्मान्स्वस्तिभिरति दुर्गाणि विश्वा। पूश्च ४६
पृथ्वी बहुला न उर्वी भवा तोकाय तनयाय शंयोः। प्रकारवो मनुना वच्यमाना देव

शैर्चीनम्रथदेवूयंतः। हृशृणावाङ्गानिनी प्राच्येति हविर्भिरंस्तुन्नये घृताची॥ ॥ इत्था
हात्कुर्वंतो[illegible]सैमन्व वेताध्वरधुयत॥ स्मरणादेवतद्विस्रोः संपूर्णस्या दितिश्रुतिः॥ ॥इ
तिहिरण्यकेशीसूत्रे दर्शपूर्णमासप्रयोगसमाप्तः॥ ६ ॥ लिखितं भैरवनाथ ब्राह्मण पुस्त
कं॥ ॥ ६ ॥ ६ ॥ ६ ॥ हेरंब लंबोदराय नमः॥ ६ ॥ ६ ॥ ६ ॥
६ ६ ६ ६ ढुंढिराज गणाधिपाय नमः॥ ॥लंबोदराय नमः॥

॥ अथ [illegible]रण्यकेशी द[illegible] [illegible]मासः ॥